**सर्वकर्त्तृ** पु० सर्वं करोति कृ–तृच्। १चतुर्मुखे ब्रह्मणि शब्दर०। २परमेश्वरे च।

**सर्वकर्मीण** त्रि०सर्वकर्मभ्योऽलं ख। सर्वकरणसमर्थे पदार्थे "संग्रामे सर्वकर्मीणावि"ति भट्टिः। [नटे शब्दर०।

**सर्वकेशिन्** पु० अभिनेयानां सर्वेषामिव केशोऽस्त्यस्य इनि।

**सर्वक्षार** पु०सर्वः क्षारमयः। (सावान)ख्याते पदार्थे राजनि०

**सर्वग** न० सर्वं गच्छति गम–ड। १जले २शिवे ३परमेश्वरे पु० मेदि०। ४वायौ ५आत्मनि च पु० शब्दमा०। ६सर्वगामिनि त्रि०। ७प्रियङ्गुवृक्षे स्त्री शब्दच० टाप्।

**सर्वगन्ध** न०सर्वे गन्धा अत्र। "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्। लवङ्गसहितञ्चैव सर्वगन्धं प्रकीर्त्तितम्" भावप्र० उक्ते १गन्धद्रव्यसमूहभेदे। सर्वान् गन्धयति हिनस्ति संहारकाले गन्धत्यच् सर्वे गन्धा उत्पाद्यतया सन्त्यस्य वा। २परमेश्वरे सर्वनाशकत्वात् सर्वगन्धहेतुत्वाद्वाऽस्य तथात्वम्।

**सर्वग्रन्थि** पु० सर्वत्र ग्रन्थिरिवात्र। १पिप्पलीमूले राजनि०।

**सर्वङ्कष** पु० सर्वं कषति कष-खच् मुम् च। १पापे २सर्वातिरेकिणि त्रि०। [सि०कौ०।

**सर्वजनीन** त्रि० सर्वजनेषु विदितः ख। सर्वत्र विख्याते

**सर्वज्ञ** पु० सर्वं जानाति ज्ञा–क। १शिवे २बुद्धे अमरः। ३परमेश्वरे च "यः सर्वज्ञः सर्ववित्" श्रुतिः। ४सर्वज्ञानकर्त्तरि त्रि०। ५दुर्गायां स्त्री "सर्वज्ञा सर्ववेत्तृत्वात्" देवीपु० ४८अ०।

**सर्वतःशुभा** स्त्री सर्वतः शुभं यस्याः। प्रियङ्गुवृक्षे शब्दच०।

**सर्वतस्** अव्य० सर्व+तसिल्। समन्तत इत्यर्थे अमरः।

**सर्वतिक्ता** स्त्री सर्वतः तिक्ता। काकमाच्यां राजनि०।

**सर्वतोभद्र** पु०न० सर्वतो भद्राणि सुखानि यस्य। १चतुर्द्वारयुक्ते १गृहभेदे प्रतिष्ठादौ पूज्यदेवतानां २मण्डलभेदे सर्वतोभद्रमण्डलशब्दे दृश्यम्। ज्योतिषोक्ते ३शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५पृ०दृश्यम्। अलङ्कारोक्ते बन्धभेदात्मके ४चित्रकाव्ये च। अलङ्कारशब्दे ४०७ पृ० दृश्यम् सर्वतो भद्रमस्मात्। ५निम्बवृक्षे पु० अमरः। ६गाम्भार्य्यां ७नटयोषिति च स्त्री मेदि०।

**सर्वतोभद्रचक्र** न० सर्वतो भद्रं यत्र तादृशं चक्रम्। ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५ पृ० दृश्यम्। [भेदे अलङ्कारशब्दे ४०७पृ०दृश्यम्।

**सर्वतोभद्रबन्ध** पु० सर्वतो भद्राकारेण बन्धः। चित्रकाव्य-

**सर्वतोभद्रमण्डल** न० सर्वतो भद्रनामकं मण्डलम्। शारदातिलकाद्युक्ते प्रतिष्ठादौ—पूज्यदेवतामण्डलभेदे

तल्लेखनप्रकारस्तु हेमाद्रौ स्कान्दे "प्रागुदीच्यां गता रेखाः कुर्य्यादेकोनविंशतिम्। खण्डेन्दुवह्निपात् कोणे कृत्वा पञ्चभिः पदैः। एकादशपदा वल्ली भद्रन्तु नवभिः पदैः। चतुर्विंशत्पदा वापी परिधिर्विंशत्या पदैः। मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम्। श्वेतेन्दुः कृत्वा, कृष्णां वल्लीं नीलेन पूरयेत्। भद्राकृष्णा सिता वापी परिधिः पीतवर्णकः। बाह्यान्तरदलैः श्वेता कर्णिका पीतवर्णिका। परिध्यावेष्टितं पद्मं बाह्ये सत्वरजस्तमः। तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरासुरानिति"। शारदायामन्यथोक्तं यथा

"चतुरस्रचतुःकोष्ठे कर्णसूत्रसमन्विते। चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम्। ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत्। यावत् शतद्वयं मन्त्री षट्पञ्चाशत् पदान्यपि। तावत्तेनैव विधिना तत्र सूत्राणि पातयेत्। षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम्। बहिःपङ्क्त्या भवेत् पीठं पङ्क्तियुग्मेन वीथिका। द्वारशोभोपशोभास्रान् शिष्टाभ्यां परिकल्पयेत्। शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्। पद्मक्षेत्रस्य सन्त्यज्य द्वादशांशं बहिः सुधीः। तन्मध्यं विभजेद् वृत्तैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केसराणां द्वितीयकम्। तृतीयं पद्मपत्राणां सन्ध्यंशेन दलाग्रकम्। बाह्यवृत्तान्तरालस्य मानेन विधिना सुधीः। निधाय केसराग्रेषु परितोऽर्द्धनिशाकरान्। लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत्। दलाग्राणाञ्च यन्मानं तन्मानाद् वृत्तमालिखेत्। तदन्तरालतन्मध्यसूत्रस्योभयतः सुधीः। आलिखेद् बाह्यहस्तेन दलाग्राणि समन्ततः। दलमूलेषु युगशः केसराणि प्रकल्पयेत्। एतत् साधारणं प्रोक्तं पङ्कजं तन्त्रवेदिभिः। पदानि त्रीणि पादार्थं पीठकोणेषु मार्जयेत्। अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत्। पदानि वीथिसंस्थानि मार्जयेत् पङ्क्तिभेदतः। दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठकैस्ततः। पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः। उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम्। अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम्। रञ्जयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम्। पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्। कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम्। विल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम्। अङ्गुलोत्सेधविस्ताराः सीमारेखाः सिताः